Typical Lessons for ‘Advanced Sanskrit’

## पाठ 25 सति-सप्तमी

(i) घण्टानाद: --------> छात्राणां गमनम्

(ii) सूर्यस्य उदय: ------------> कृषिवलस्य कार्यम्

(iii) रेलयानास्य आगमनम् -----------> यात्रिकाणाम् आरोहणम्

(एकस्या: क्रियाया: अनन्तरं साक्षात् तत्संबन्धिनी अपारा क्रिया भवति । किन्तु कर्ता भिन्न: ।)

1. घण्टानादे जाते छात्रा: वर्गात् बहि: अधावन् । --।
2. सूर्ये उदिते कृषिवल: कार्यम् आरभते । ।-----> ईदृशी रचना सतिसप्तमी नाम्ना प्रसिद्धा ।
3. रेलयाने संप्राप्ते यात्रिका: यानम् आरूढा: । --।

सतिसप्तमीरचनां निष्कास्य अपि एतानि वाक्यानि लिखितुं शक्यानि ।

1. यदा घण्टानाद: जात: तदा छात्रा: वर्गात् बहि: अधावन् ।
2. यदा सूर्य: उदित: तदा कृषिवल: कार्यम् आरभते ।
3. यदा रेलयानं सम्प्राप्तं तदा यात्रिका: यानम् आरूढा: ।

सतिसप्तमीरचनां निष्कासयितुं कदाचित् 'यद्यपि-तथापि', 'यदि-तर्हि', 'यावत्-तावत्' एतेषामपि प्रयोग: भवति ।

यथा -

1. कृतेऽपि अध्ययनं पूर्णगुणान् न प्राप्नोमि । --> यद्यपि कृतम् अध्ययनं तथापि पूर्णगुणान् न प्राप्नोमि ।
2. रचितेऽपि काव्ये फलं न प्राप्यते । --> यद्यपि रचितं काव्यं तथापि फलं न प्राप्यते ।
3. अवशिष्टे अन्ने दरिद्रेषु वितर । --> यदि अवशिष्टम् अन्नं तर्हि दरिद्रेषु वितर ।
4. मृत्यौ निश्चिते भयेन किम्? --> यदि मृत्यु: निश्चित: तर्हि भयेन किम्?
5. सिद्धे पाके अतिथय: आगता । --> यावत् सिद्ध: पाक: तावत् अतिथय: आगता ।
6. धनस्य अभावे दुर्लक्षित: आसम् । --> यावत् धनस्य अभाव: (आसीत्) तावत् दुर्लक्षित: आसम् ।

---------------------------------------------------------- भाषाभ्यास: ------------------------------------------------

**A.सतिसप्तमीरचनां निष्कासयत।**

1. आम्रे पतिते किशोर: अधावत् । 2. वसन्तसमये प्राप्ते काक: काक: पिक: पिक: ।
3. रामे वनं गते रावणेन सीता अपहृता । 4. अपत्ये क्रन्दिते माता धावन्ती आगाच्छत् ।
5. अध्यापके प्रविष्टे तूष्णीम् उपविशन्तु । 6. मोदकं खादितवान् बालके माता आगता ।
7. ज्ञाते तत्त्वे क: संसार:? 8. क्षीणे पुण्ये मर्त्यलोकं प्रविशति ।
9. दु:खेषु प्राप्तेषु न तस्य उद्वेग: । 10. प्राप्ते मित्रे विमुख: न भवति स: ।
11. तण्डुलेषु सुपक्वेषु अग्निं शामय ।

**B. सति-सप्तमी-रचनायुक्तानि अन्यानि सुभाषितानि अन्विष्यत ।**

------------------------------------------------------------------------------------------------------------------

## पाठ 26 समासा:।

निम्नदत्वा वाक्यानि पठत।

1.अरण्ये वृक्षा: च खगा: च पशव: च आसन्। ----> अरण्ये **वृक्षखगपशव:** आसन्।

2.अरण्ये फलानि च पुष्पाणि च पत्राणि च आसन्। ----> अरण्ये **फलपत्रपुष्पाणि** आसन्।

वृक्षा: च खगा: च पशव: = वृक्षखगपशव:।

फलानि च पुष्पाणि च पत्राणि = फलपत्रपुष्पाणि।

In the above sentences see the words printed in the bold type carefully. More than one word is combied in them. Such words are called compounds (समस्तपदानि) or compound words. When the three words वृक्षा:, खगा:, पशव: are combined the प्रत्ययs of वृक्ष, खग are dropped.The compound word वृक्षखगपशव: is formed.

**एतानि उदाहरणानि अपि पश्यत ।**

1.सूर्यस्य प्रकाश: ---- सूर्यप्रकाश: । 2. दशरथस्य पुत्र: ---- दशरथपुत्र: ।

3.प्रिय: देश: ---- प्रियदेश:। 4. वाल्मीकिना रचितम् ---- वाल्मीकिरचितम्।

संक्षेप: नाम समास: ।

समास: भाषाया: महत्वपूर्णं वैशिष्ट्यम् ।समासा: अर्थम् अनुसरन्ति ।

सन्धिसमासयो: कृते पदद्वयं एव आवश्यकं किन्तु तयोर्भेद: द्रष्टव्य ।

| **सन्धि:** | **समास:** |
|---|---|
| 1.उच्चारणं प्रधानम् । | 1. अर्थ: प्रधान: । |
| 2.विभक्तिप्रत्यानां लोप: न भवति । | 2. विभक्तिप्रत्यानां लोप: भवति । |
| 3. सन्धौ समास: न शक्य: । | 3. समासे सन्धि: शक्य: । |
| 4. सूर्यस्य + उदय: = सूर्यस्योदय: । | 4. सूर्यस्य + उदय: = सूर्य + उदय: = सूर्योदय:। |

सामासिकशब्दे पदद्वयम् 1.पूर्वपदम् 2.उत्तरपदम्

| **सामासिकपदम्** | **पूर्वपदम्** | **उत्तरपदम्** |
|---|---|---|
| सूर्योदय: | सूर्य | उदय: |
| नीलकण्ठ: | नील | कण्ठ: |

पदस्य प्रधानत्वं क्रियापदेन सिध्यति । प्रधानेत्वेन समासानां चत्वार: प्रकारा:। यथा

| | पूर्वपदम् | उत्तरपदम् | अर्थप्रधानत्वम् | समासप्रकार: | उदाहरणम् |
|---|---|---|---|---|---|
| 1 | ✔ | X | पूर्वपदप्रधान: | अव्ययीभाव: | प्रतिदिनम् |
| 2 | X | ✔ | उत्तरपदप्रधान: | तत्पुरुष: | दशरथपुत्र: |
| 3 | ✔ | ✔ | उभयपदप्रधान: | द्वन्द्व: | रामलक्ष्मणौ |
| 4 | X | X | अन्यपदप्रधान: | बहुव्रीहि | नीलकण्ठ: |

समासा:

।

द्वंद्व:(उभयपदप्रधान:) तत्पुरुष:(उत्तरपदप्रधान:) बहुव्रीहि(अन्यपदप्रधान:)

अव्ययीभाव:(पूर्वपदप्रधान:)

इतरेतरद्वंद्व: ।

समाहारद्वंद्व: ।

(द्विगु is one ।

type of समाहारद्वंद्व:) ।

।   ।

विभक्ति-तत्पुरुष: कर्मधाराय:

उपपद-तत्पुरुष: विशेषण-विशेष्य-सम्बन्ध:

नञ- तत्पुरुष: विशेषनाम-सामान्यनाम-सम्बन्ध:

उपमान-उपमेय-सम्बन्ध:

**26.1 इतरेतरद्वंद्व: समास:** - इतर + इतर -- भिन्नपदानि प्रयुज्यन्ते अत्र ।

Ex.

(i) चंद्रसूर्यौ - चन्द्र: च सूर्य: च

(ii) बालकबालिका: - बालका: च बालिका: च ।

(iii) वृक्षलता: - वृक्षा: च लता: च।

अवगत --

1. लघुशब्द: ( न्यूनस्वरयुक्त: शब्द:) प्रथम: भवेत् ।
2. समस्तपदं नित्यं द्विवचने बहुवचने वा ।
3. समस्तपदस्य लिङ्गम् उत्तरपदानुसारम् ।
4. विग्रहे, प्रतिपदं प्रथमा विभक्ति: योजनीया ।
5. विग्रहे, प्रतिपदं च इति अव्ययम् उपयोक्तव्यम् ।
6. समस्तपदं बहुवचने चेत् प्रतिपदम् अर्थानुसारम् ।
7. समस्तपदं द्विवचने चेत् प्रतिपदम् एकवचनम् ।